दत्तः । ४ अन्यतात्पर्य्यज्ञापके पौनःपुन्येन कथनरूपे लिङ्गभेदे "उपक्रमोपसंहाराबभ्यासोऽपूर्व्वता फलम् । अर्थवादोपपत्ती च हेतुस्तात्पर्यनिर्णये इति" उक्तः यथा छान्दोग्ये षष्ठप्रपाठके "तत्त्वमसि श्वेतकेतो ! इत्यस्य नवकृत्वः अभ्यासः । ५ एकस्मिन्नालम्बने देवादौ इतरतः समाहृत्य मनसः स्थापने च । कर्म्मणि घञ् । ६ व्याकरणोक्तयोः द्विरुक्तभावापन्नयोः धातुभागयोः । "स्यादिष्व अभ्यासेन चाभ्यासस्य" पा० ।

**अभ्यासयोग** पु० अभ्यासेन सततानुशीलनेन योगः । सततैकविषयचिन्तनेन जाते समाधौ । "अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय" ! "अभ्यासयोगयुक्तात्मा ततो याति परां गतिमिति" च गीता ।

**अभ्यासादन** न० अभि+आ+सद्–णिच् ल्युट् । १ शत्र्वाद्यैः शत्रोर्निर्बलताकरणे, २ शत्रोः सम्मुखगमने ३ समीपस्थापने च ।

**अभ्याहार** पु० अभि+आ+हृ–घञ् । १ अभिहारार्थे २ समाहरणे ३ आभिमुख्येन आनयने च । "अस्मिन्नु हैकेऽवान्तरदेशे कर्षूं खात्वा ततोऽभ्याहारं कुर्व्वन्ति" शत०ब्रा०

**अभ्याहित** त्रि० अभि+आ+धा–कर्म्मणि क्त । १ आभिमुख्येन मन्त्रादिना स्थापिते विधिना कृतसंस्कारे वह्नौ ।

**अभ्युक्त** त्रि० आभिमुख्येनोक्तः । १ सम्यगुक्ते २ प्रकाशिते च

**अभ्युक्षण** न० अभि+उक्ष–सेचने ल्युट् । "उत्तानेनैव हस्तेन प्रोक्षणं परिकीर्त्तितम् । न्यञ्चताभ्युक्षणं प्रोक्तं तिरश्चावोक्षणं स्मृतम्" स्मृत्युक्ते अवतानपाणिना सेच्याभिमुख्येन, सेचने २ सेचनमात्रे "परस्पराभ्युक्षणतत्पराणाम्" रघुः अभ्युक्ष्यं च स्नानकार्य्ये कात्या० २२,६,१४ । कर्त्तव्यमिति शेषः । अभ्युक्षणादि च द्रव्यादिसंस्कारविशेषः अभ्युक्षितद्रव्याणामेव यागाङ्गत्वात् । स च संस्कारः अदृष्टविशेषरूपः द्रव्यनिष्ठ इति मीमांसकाः तेषामयमाशयः । यो यद्गतफलार्थितया क्रियते स तन्निष्ठफलजनकव्यापारजनक इति नियमेन ब्रीह्यादिगतावघातानुकूलशक्तिरूपफलार्थितया क्रियमाणानां प्रोक्षणाभ्युक्षणादीनां स्वगतावघातादिरूपफलजनकव्यापारत्वम् तथा च प्रोक्षिता एव ब्रीह्यादयोऽवघातादौ कल्पन्ते प्रोक्षणादिजन्यः कालान्तरभाव्यवघातजनकोव्यापारो ब्रीह्यादिनिष्ठ एव कल्प्यते" इति ॥ नैयायिकास्तु "संस्कारः पुंसएवेष्टः प्रोक्षणाभ्युक्षणादिभिः" कुसुमा० उक्तेः प्रोक्षणादिभिः संस्कारोऽदृष्टं पुंसएव पुंनिष्ठः एव स्वीक्रियते प्रतिब्रीह्यादि नानाशक्तिकल्पनापेक्षया एकस्यैवादृष्टस्यात्मनिष्ठस्य प्रोक्षणादिजन्यस्य लाघवेन कल्पनात् शास्त्रदेशितं फलमनुष्ठातरीतिन्यायेन क्रियाकर्त्तर्य्येव प्रधानफलवत्तत्तदवान्तरादृष्टस्यापि तत्रैव कल्पनौचित्यात् अन्यथा अन्यगतादृष्टेन अन्यगतप्रधानापूर्व्वजनने वैयधिकरण्यात् अतिप्रसङ्गः स्यात् ब्रीह्यादेश्च सर्व्वपुरुषसाधारणत्वेनानियामकत्वात् अन्यथा अकृतप्रोक्षणादिसंस्कारस्यापि पुंसः परकृतसंस्कारेण प्रधानापूर्व्ववत्त्वापत्तेः । यो यद्गतफलार्थितयेत्यादिनियमस्य शत्रुनिष्ठबधाद्युद्देशेन क्रियमाणे श्येनयागादौ व्यभिचारान्नार्थसाधकत्वं तत्र हि शत्रुगतबधफलाद्युद्देशेऽपि अभिचारिपुरुषगतस्यादृष्टविशेषस्य कल्पनावश्यम्भावात् अन्यथा तत्कर्त्तुः प्रायश्चित्तोपदेशस्यानर्थक्यापत्तेः अभिचारकर्म्मणश्च उपपातकमध्ये मन्वादिभिर्गणनात् तस्य पापजनकत्वसिद्धिरिति ।

**अभ्युक्षित** त्रि० अभि+उक्ष–क्त । कृताभ्युक्षणे यज्ञपात्रादौ

**अभ्युक्ष्य** त्रि० अभि+उक्ष–अर्हार्थे ण्यत् । अभ्युक्षणार्हे । ल्यप् । अवतानपाणिना सिक्त्वेत्यर्थे अव्य० "असन्दैनमवष्टभ्य हुत्वाभ्युक्ष्य सोमोपनहनेन" कात्या० २२,६,१३ । तेनोदकेनात्मानं पूजनोपकरणञ्चाभ्युक्ष्येति" त०सा० ।

**अभ्युच्चय** पु० अभि+उद्+चि–अच् । १वृद्धौ । "अभ्युच्चयस्तु लक्ष्मीः" किरा०२,१९ मल्लिनाथोक्तेः २लक्ष्म्यामपि ।

**अभ्युत्थान** न० अभि+उत्–स्था–ल्युट् । १आदरेणासनादित उत्थाने २गौरवेणोत्थानादिना ३प्रत्युद्गमने, ४उत्थानमात्रे, ५उद्यमे, ६उद्भवे च । "नवाभ्युत्थानदर्शिन्योननन्दुः सप्रजाः प्रजाः" रघुः "अभ्युत्थानमधर्म्मस्य तदात्मानं सृजाम्यहम्" गीता । [कर्त्तरि स्त्रियां ङीप् ।

**अभ्युत्थायिन्** त्रि० अभि+उद्+स्था–णिनि । अभ्युत्थान

**अभ्युत्थित** त्रि० अभि+उद्–स्था–क्त । १कृताभ्युत्थाने अभिवादे सम्मानार्थमासनादित उत्थिते । २अभिमुखेनोद्गते च "अभ्युत्थिताग्निपिशुनैरतिथीनाश्रमोन्मुखान्" रघुः !

**अभ्युत्थेय** त्रि० अभि+उद्+स्था–उपसृष्टत्वात् कर्म्मणि यत् । अभिवाद्ये यस्याभिवादनार्थमासनादित उत्थानं क्रियते तस्मिन् । "अभ्युत्थेयस्यापि" कात्या० २२,५,२७ गुर्व्वादेरभ्युत्थेयस्यापि अभ्युत्थानमिति" कर्क० ।

**अभ्युत्पतन** न० अभि+उत्+पत–ल्युट् । आभिमुख्येनोत्पतने "अलक्षिताभ्युत्पतनो नृपेण प्रसह्य सिंहः" रघुः ।

**अभ्युदय** पु० अभि+उत्+इण्–अच् । १अभीष्टकार्य्याणां प्रादुर्भावे, २वृद्धौ, "भवो हि लोकाभ्युदयाय तादृशाम्" रघुः ।